श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे

# ॥ पञ्चमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ पञ्चमः सर्गः ॥

## श्रीरामसुग्रीवयोर्मैत्री श्रीरामेण वालिवधाय प्रतिज्ञाकरणं च

ऋष्यमूकात् तु हनुमान् गत्वा तं मलयं गिरिम्।
आचचक्षे तदा वीरौ कपिराजाय राघवौ॥ **4.5.1** ॥

अयं रामो महाप्राज्ञ सम्प्राप्तो दृढविक्रमः।
लक्ष्मणेन सह भ्रात्रा रामोऽयं सत्यविक्रमः॥ **4.5.2** ॥

इक्ष्वाकूणां कुले जातो रामो दशरथात्मजः।
धर्मे निगदितश्चैव पितुर्निर्देशकारकः॥ **4.5.3** ॥

राजसूयाश्वमेधैश्च वह्निर्येनाभितर्पितः।
दक्षिणाश्च तथोत्सृष्टा गावः शतसहस्रशः॥ **4.5.4** ॥

तपसा सत्यवाक्येन वसुधा येन पालिता।
स्त्रीहेतोस्तस्य पुत्रोऽयं रामोऽरण्यं समागतः॥ **4.5.5** ॥

तस्यास्य वसतोऽरण्ये नियतस्य महात्मनः।
रावणेन हृता भार्या स त्वां शरणमागतः॥ **4.5.6** ॥

भवता सख्यकामौ तौ भ्रातरौ रामलक्ष्मणौ।
प्रगृह्य चार्चयस्वैतौ पूजनीयतमावुभौ॥ **4.5.7** ॥

श्रुत्वा हनूमतो वाक्यं सुग्रीवो वानराधिपः।
दर्शनीयतमो भूत्वा प्रीत्योवाच च राघवम्॥ **4.5.8** ॥

भवान् धर्मविनीतश्च सुतपाः सर्ववत्सलः।
आख्याता वायुपुत्रेण तत्त्वतो मे भवद्गुणाः॥ **4.5.9** ॥

तन्ममैवैष सत्कारो लाभश्चैवोत्तमः प्रभो।
यत्त्वमिच्छसि सौहार्दं वानरेण मया सह॥ **4.5.10** ॥

रोचते यदि मे सख्यं बाहुरेष प्रसारितः।
गृह्यतां पाणिना पाणिर्मर्यादा बध्यतां ध्रुवा॥ **4.5.11** ॥

एतत् तु वचनं श्रुत्वा सुग्रीवस्य सुभाषितम्।
सम्प्रहृष्टमना हस्तं पीडयामास पाणिना॥ **4.5.12** ॥

हृष्टः सौहृदमालम्ब्य पर्यष्वजत पीडितम्।
ततो हनूमान् सन्त्यज्य भिक्षुरूपमरिन्दमः॥ **4.5.13** ॥

काष्ठयोः स्वेन रूपेण जनयामास पावकम्।
दीप्यमानं ततो वह्निं पुष्पैरभ्यर्च्य सत्कृतम्॥ **4.5.14** ॥

तयोर्मध्ये तु सुप्रीतो निदधौ सुसमाहितः।
ततोऽग्निं दीप्यमानं तौ चक्रतुश्च प्रदक्षिणम्॥ **4.5.15** ॥

सुग्रीवो राघवश्चैव वयस्यत्वमुपागतौ।
ततः सुप्रीतमनसौ तावुभौ हरिराघवौ॥ **4.5.16** ॥

अन्योन्यमभिवीक्षन्तौ न तृप्तिमभिजग्मतुः।
त्वं वयस्योऽसि हृद्यो मे ह्येकं दुःखं सुखं च नौ॥ **4.5.17** ॥

सुग्रीवो राघवं वाक्यमित्युवाच प्रहृष्टवत्।
ततः सुपर्णबहुलां भङ्क्त्वा शाखां सुपुष्पिताम्॥ **4.5.18** ॥

सालस्यास्तीर्य सुग्रीवो निषसाद सराघवः।
लक्ष्मणायाथ संहृष्टो हनुमान् मारुतात्मजः॥ **4.5.19** ॥

शाखां चन्दनवृक्षस्य ददौ परमपुष्पिताम्।
ततः प्रहृष्टः सुग्रीवः श्लक्ष्णं मधुरया गिरा॥ **4.5.20** ॥

प्रत्युवाच तदा रामं हर्षव्याकुललोचनः।
अहं विनिकृतो राम चरामीह भयार्दितः॥ **4.5.21** ॥

हृतभार्यो वने त्रस्तो दुर्गमेतदुपाश्रितः।
सोऽहं त्रस्तो वने भीतो वसाम्युभ्रान्तचेतनः॥ **4.5.22** ॥

वालिना निकृतो भ्रात्रा कृतवैरश्च राघव।
वालिनो मे महाभाग भयार्तस्याभयं कुरु॥ **4.5.23** ॥

कर्तुमर्हसि काकुत्स्थ भयं मे न भवेद् यथा।
एवमुक्तस्तु तेजस्वी धर्मज्ञो धर्मवत्सलः॥ **4.5.24** ॥

प्रत्यभाषत काकुत्स्थः सुग्रीवं प्रहसन्निव।
उपकारफलं मित्रं विदितं मे महाकपे॥ **4.5.25** ॥

वालिनं तं वधिष्यामि तव भार्यापहारिणम्।
अमोघाः सूर्यसङ्काशा ममेमे निशिताः शराः॥ **4.5.26** ॥

तस्मिन् वालिनि दुर्वृत्ते निपतिष्यन्ति वेगिताः।
कङ्कपत्रप्रतिच्छन्ना महेन्द्राशनिसन्निभाः॥ **4.5.27** ॥

तीक्ष्णाग्रा ऋजुपर्वाणः सरोषा भुजगा इव।
तमद्य वालिनं पश्य तीक्ष्णैराशीविषोपमैः॥ **4.5.28** ॥

शरैर्विनिहतं भूमौ प्रकीर्णमिव पर्वतम्।
स तु तद् वचनं श्रुत्वा राघवस्यात्मनो हितम्।
सुग्रीवः परमप्रीतः परमं वाक्यमब्रवीत्॥ **4.5.29** ॥

तव प्रसादेन नृसिंह राघव
प्रियां च राज्यं च समाप्नुयामहम्।
तथा कुरु त्वं नरदेव वैरिणं
यथा न हिंस्यात् स पुनर्ममाग्रजम्॥ **4.5.30** ॥

सीताकपीन्द्रक्षणदाचराणां
राजीवहेमज्वलनोपमानि।
सुग्रीवरामप्रणयप्रसङ्गे
वामानि नेत्राणि समं स्फुरन्ति॥ **4.5.31** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
किष्किन्धाकाण्डे पञ्चमः सर्गः॥